परीक्षितुं पूर्वपक्षयति । शब्दस्यार्थान्तरकल्पनाऽविशेषाद्वाक्छलमेवोपचारच्छलं स्यादिति द्वित्वमेव न तु त्रित्वमिति शङ्कार्थः ॥ ६ सू० ॥ समाधत्ते । उपचारच्छलस्य वाक्छलाभेदो न, तयोरर्थान्तरभावात् भिन्नत्वात् भिन्नतया प्रमाणसिद्धत्वादिति फलितार्थः। पूर्व्वोक्तभेदकधर्म्मेण भेदसम्भवेऽपि यत्किञ्चिद्धर्मेणाभेदे सामान्यधर्मेणाभेदस्य सर्व्वत्र सम्भवाद्विभागः कुत्रापि न स्यादिति । ७ सू० । विपक्षे बाधकमभिप्रेत्याह यत्किञ्चिद्धर्मादविशेषे किञ्चित्साधर्म्याच्छलत्वादिरूपाच्छलस्यैक्यं स्यान्न तु त्वदभिमतं द्वित्वमपीति भावः" ॥ ८ वृत्तिः "आक्षिप्तकेतुकुथसैन्यगजच्छलेन" माघः । "धर्म्मेण व्यवहारेण छलेनाचरितेन च । प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च" मनुः । "भुवनहितच्छलेन यम्" भट्टिः "अध्यारुरोहेव रजश्छलेन" रघुः । "छलं निरस्य भूतेन व्यवहाराद्वयेन्नृपः" याज्ञ० । "भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम्" नारदोक्ते ८प्रमादाभिहिते च ९छलकारिणि त्रि० । स्वार्थे क । तत्रार्थे "आवाभ्यां (मधुकैटभाभ्याम्)छाद्यते विश्वं रजसा तमसा तथा । रजस्तमोमयावावां यतीनां दुःखलक्षणौ । छलकौ धर्म्मशीलानां दुस्तरौ सर्वदेहिनाम्" हरिवं०२०३अ० । १०नाटकप्रभेदवीथ्यङ्गभेदे न० "वीथ्यामेको भवेदङ्कः" इत्युपक्रमे "अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः । उद्घात्यकावलगितेत्यादिना विभज्य सा० द० लक्षितं यथा "प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलना छलम्" "यथा वेण्यां भीमार्ज्जुनौ" "कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम् । कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः क्वास्ते ? दुर्य्योधनोऽसौ कथयतु न रुषा द्रष्टुमभ्यागतौ स्वः" ।

**छल** नामधातुः छल+इतौ-णिच् सक० सेट् । छलयति "छलयति विक्रमणे अद्भुत वामनः" गीतगो० "द्यूतं छलयतामस्मि" गीता ।

**छलन** न० छल+इतौ णिच्—भावे ल्युट् । १प्रतारणे "यथापरं यथायोगं न च स्यात् छलनं पुनः" भा० भी० १अ० । युच् । २वञ्चनायां स्त्री शब्दार्थचि० । "छलना छलम्" सा० द० ।

**छलिक** न० नाटकभेदे अलङ्कारशब्दे २९२पृ० उक्ते दृश्यकाव्यभेदे दृश्यम् । "देवि ! शर्म्मिष्ठायाः कृतं चतुष्पदीम् छलिकं दुष्प्रयोज्यमुदाहरन्ति" मालविका० ।

**छलित** छल+नामधा० कर्म्मणि क्त । १प्रतारिते "छलितरामं नाटकम् । भावे क्त । २प्रतारणे न० ।

**छल्ली** स्त्री छद—क्विप् तां लाति ला—क गौरा० ङीष् । १वल्कले (छाल) शब्दरत्ना० २लतायाम् ३सन्ततौ च । मेदि० ला—बा० कि । छल्लिरपि तत्रार्थे ।

**छवि** (वी) स्त्री छ्यति असारं छिनत्ति तमो वा छो—वि—क्विन्च वा ङीप् । १शोभायां २कान्तौ च अमरः । "आपाण्डुरमुखच्छविः" रघुः । "आपाण्डरीभूतमुखच्छवीनाम् कुमा० ।

**छष** बधे भ्वा० उभ० सक० सेट् । छषति ते अच्छा(च्छ)षीत् अच्छषिष्ट । चच्छाष चच्छषे । [त्रि० ।

**छा** पु० छो—क्विप् । १पारदे एकाक्षरको० २छेदनकर्त्तरि

**छाग** पुंस्त्री छो—गन् स्वनामख्याते पशुभेदे अमरः । जातित्वात् स्त्रियां ङीष् । २पुरोडाशे न० शब्दार्थचि० । छागस्य दुग्धम् अण् । ३छाग्या दुग्धे न० छागस्येदमण् । ४छागसम्बन्धिनि त्रि० स्त्रियां ङीप् । छागस्य लक्षणादिकं वृ० सं० दर्शितं यथा

"छागशुभाशुभलक्षणमभिधास्ये नवदशाष्टदन्तास्ते ।
धन्याः स्थाप्या वेश्मनि सन्त्याज्याः सप्तदन्ता ये ।
दक्षिणपार्श्वे मण्डलमसितं शुक्लस्य शुभफलं भवति ।
ऋश्यनिभकृष्णलोहितवर्णानां श्वेतमपि शुभदम् ।
स्तनवदवलम्बते यः कण्ठेऽजानां मणिः स विज्ञेयः ।
एकमणिः शुभफलकृद्धन्यतमा द्वित्रिमणयो ये ।
मुण्डाः सर्वे शुभदाः सर्वसिताः सर्वकृष्णदेहाश्च ।
अर्धासिताः सितार्धा धन्याः कपिलार्धकृष्णाश्च ।
विचरति यूथस्याग्रे प्रथमं चाम्भोऽवगाहते योऽजः ।
स शुभः सितमूर्धा वा मूर्धनि वा टिक्किका यस्य ।
स पृषतकण्ठशिरा वा तिलपिष्टनिभश्च ताम्रदृक् शस्तः ।
कृष्णचरणः सितो वा कृष्णो वा श्वेतचरणो यः ।
यः कृष्णाण्डः श्वेतो मध्ये कृष्णेन भवति पट्टेन ।
यो वा चरति सशब्दं मन्दं च स शोभनश्छागः ।
ऋश्यशिरोरुहपादो यो वा प्राक्पाण्डुरोऽपरे नीलः ।
स भवति शुभकृच्छागः कोशस्याप्यं गर्गोक्तः । कुट्टकः
कुटिलश्चैव जटिलो वामनस्तथा । ते चत्वारः श्रियः पुत्रा
नालक्ष्मीके वसन्ति ते । अथाप्रशस्ताः खरतुल्यनादाः
प्रदीप्तपुच्छाः कुनखा विवर्णाः । निकृत्तकर्णा द्विपमस्तकाश्च